म. म. श्रीकमलाकरभट्टप्रणीतः

# निर्णयसिन्धुः

पाठान्तरसहित-टिप्पण्यादिभिर्विभूषितः


प्रधानसम्पादकः

**प्रो. परमेश्वरनारायणशास्त्री**

सटिप्पण-सम्पादकः

**श्री पं. नारायणराम आचार्यः**



**राष्ट्रियसंस्कृतसंस्थानम्**

मानितविश्वविद्यालयः

नवदेहली

# भूमिका

इह खलु निखिलधर्माचाराचरणभास्वरे भारते खण्डेऽद्यावधि परमकारुणिकैर्निगमागमपारावारपारीणैः कर्मोपासनाज्ञानकाण्डत्रयधुरीणैरनेकैर्महर्षिभिरनेके लघवो महान्तश्च स्मृत्यादयो धर्मशास्त्रनिबन्धा लोकोपकृतये धर्मसेतुपालनाय च सादरं प्रणीताः सन्ति। परं तेषु **बह्वृषि**प्रणीतत्वेनान्योन्यविरोधतयेदमित्थमेवेति निर्णयानैकविध्यात्तत्र तत्र भूरिशः संदेहस्थलान्यासन्। एतदापन्मार्जनाय श्रीकाशीक्षेत्रे महामहोपाध्यायैः **कमलाकरभट्टै**र्बहुशः पूर्वतनान्सिद्धान्तग्रन्थानालोड्य मतमतान्तरखण्डनपूर्वं सर्वेषामेकवाक्यतयायं मीमांसाप्रचुरो **निर्णयसिन्धु**नामा ग्रन्थो व्यरचि। स च सर्वत्राव्याहतत्वेन प्रसृतः सन्नखिलधर्मशास्त्रग्रन्थेषु चूडामणीभूय विराजतेतराम्।

एतद्ग्रन्थप्रणेतुः कमलाकरभट्टस्येतिवृत्तमित्थं श्रूयते—पूर्वं प्रतिष्ठान (पैठन) पत्तने महाविद्वान् सदाचारसंपन्नश्चाश्वलायनशाखीयो **गोविन्दभट्टा**ख्यो देशस्थब्राह्मण आसीत्। तस्य च महापण्डितः सदाचारशमदमादिसंपत्संपन्नः पित्रधिकगुणो **रामेश्वरभट्ट**नामा पुत्रो बभूव। स चानवद्यविद्याविलासेन लोकेष्वभ्यर्हितोऽपि चिरकालपर्यन्तमनपत्यत्वेन दूयमानान्तःकरणो निर्दिष्टहेतुनैवोद्भूतनिर्वेदः सन् यात्रामिषेण श्रीविश्वेश्वर-मन्दाकिनी-विद्वद्वरमण्डितं काशीक्षेत्रं जगाम। तत्राहर्दिवं श्रीविश्वेश्वरदर्शनेन विद्वन्मण्डलसान्निध्येन गङ्गोदकामृतावगाहपानादिना च संजाताभिनवानन्दसंदोहभरेण निर्भररञ्जितान्तःकरणः श्रीरामचन्द्रचरणपरिचरणाचरणस्तत्रैव बहुदिनगणमवात्सीत्। तत्र निवसतो यातेषु कतिपयाहर्गणेषु श्रीरामचन्द्रस्य करुणामृतपूर्णदृशा प्रारब्धदशासुविपाकेन चोत्तरावस्थायामनवद्यगुणगणालंकृतो विद्वन्मौलिनिघृष्टचरणकमलोऽतीव ब्रह्मवर्चस्वी **नारायणभट्टा**ह्वयः पुत्रो बभूव।

**नारायणभट्ट**विषयिणी श्रूयते तदानींतनेत्थमतिमननीया किंवदन्ती-कदाचिदार्यधर्मध्वंसाय बद्धपरिकरैर्दुर्यवनैरेकीभूय "काश्यां सर्वैः प्रेमातिशयेन रात्रंदिवं श्रीविश्वेश्वर एव भजनार्चनादिना सेव्यते, अतोऽस्य वैगुण्ये संपादिते तद्धर्महानिः सुलभतरा स्यात्" इति विचार्य श्रीविश्वेश्वरमन्दिरमुत्सन्नमकारि। तद्दुष्कर्मालोच्य सर्वेऽपि यवनराजप्रतीकारासमर्थाः केवलं दुःखार्णवेऽमाङ्क्षुः। तदानीमेव तत्रेश्वरक्षोभाद्दुर्भिक्षनिदानं महदवर्षणमभवत्। एतदन्तरा यवनै**र्नारायणभट्ट**स्य ब्रह्मवर्चसतेजोविशेषं लोकमुखोद्गीर्णमाकर्ण्य तत्परीक्षार्थमेव तं प्रति गत्वा 'कथमिदं दुःसहमवर्षणमभवत्? संप्रति भवन्तो वृष्टौ समर्थाः स्थ न वा?' इति पृष्टम्। तच्छ्रुत्वा किंचित्कालं विचार्य तैरुत्तरितं—'भवत्कृतमन्दिरोच्छेदक्षुब्धेश्वरेच्छापरिणाम एवायमवर्षणरूपेण लोकान्संतापयन्नुज्ज्वलति। अतस्तन्मन्दिरं पूर्ववदुपक्लृप्तं चेदीशकृपया सुवृष्टिः स्यात्। यदि पुनः कल्पितेऽपि प्रासादे वृष्टिर्न स्याच्चेदहं स्वधर्मं हित्वा भवदिष्टमेव यावनधर्मं स्वीकरोमि' इति। यवनैरित्थं निःशङ्कं निर्बन्धवचः श्रुत्वा 'भवत्प्रभावेणाद्यैव यदि वृष्टिः स्यान्मन्दिरं पूर्ववत्साधयिष्यामस्तत्तूर्णं यतितव्यम्' इति प्रार्थितसमनन्तरमेव ओमिति भगवन्तं हृदिकृत्य तपस्यार्थं भट्टे प्रायोपविष्टे तदहरेवेशकृपया सुवृष्टिरभवत्। तदा

# निर्णयसिन्धुविषयानुक्रमः

## प्रथमपरिच्छेदः


| विषयाः | पृष्ठांकाः |
|---|---|
| मङ्गलाचरणम् | १ |
| संक्षेपतः कालनिर्णयः | २ |
| अब्दः पञ्चधा | २ |
| चान्द्रोऽब्दः षष्टिभेदः | २ |
| संवत्सरनामानि तन्निर्णयश्च | २ |
| संवत्सरनिर्णयः | २ |
| अयननिर्णयः | २ |
| अयनयोर्विनियोगः | २ |
| तत्र गृहप्रवेशदेवताप्रतिष्ठादि-निर्णयः | २ |
| दक्षिणायनेऽपि प्रतिष्ठा | २ |
| ऋतुनिर्णयः | ३ |
| ऋतुमासभेदाः | ३ |
| मासनिर्णयः | ३ |
| संक्रान्तिनिर्णयः | ३ |
| सर्वसंक्रान्तिषु दानानि | ३ |
| संक्रान्तावुपवासदाननिर्णयः | ४ |
| संक्रान्तौ श्राद्धम् | ४ |
| विष्णुपदादिस्वरूपम् | ४ |
| अत्र च पिण्डरहितं श्राद्धम् | ५ |
| कुत्रचिद्रात्रौ स्नानम् | ५ |
| जन्मर्क्षे संक्रान्तौ स्नाने विशेषः | ६ |
| कुत्रचित्सायंसंध्यानिषेधः | ६ |
| चान्द्रादिमासकथनम् | ६ |
| सावनादिमासव्यवस्था | ६ |
| मलमासक्षयमासनिर्णयः | ७ |
| अधिकमासकालनियमः | ७ |
| क्षयमासस्यागमकालनियमः | ७ |
| मलमासे कार्याकार्यनिर्णयः | ८ |
| मलमासे वर्ज्यानि | ११ |
| क्षयमासे वर्ज्यावर्ज्यविचारे | ११ |
| शुक्रगुर्वस्तादिविचारः | ११ |
| गुरुशुक्रास्तादौ वर्ज्यम् | ११ |
| सिंहस्थे कन्यागते वा गुरौ गोदावरीकृष्णास्नानम् | १२ |
| अतिचारगते जीवे | १२ |
| गुरुशुक्रयोर्बाल्यवृद्धत्वविचारः | १२ |

| विषयाः | पृष्ठांकाः |
|---|---|
| बाल्यादेर्देशपरत्वेन व्यवस्था | १२ |
| अस्तादेरपवादः | १२ |
| मलमासे च व्रतविशेषः | १३ |
| पक्षनिर्णयतिथिनिर्णयौ | १३ |
| तिथेर्वेधादिनिर्णयः | १३ |
| सायंप्रातर्वेधलक्षणम् | १३ |
| तिथिविशेषे वेधविशेषः | १३ |
| कर्मकालव्यापिनीतिथिः | १४ |
| युग्मतिथिविचारः | १४ |
| सामान्यतो दशमी | १४ |
| त्रयोदशी | १४ |
| कृष्णपक्षे विशेषः | १४ |
| खर्वदर्पलक्षणम् | १४ |
| एकभक्तकालनिर्णयः | १४ |
| नक्त प्रदोषयोर्विचारः | १५ |
| प्रदोषे निषिद्धपदार्थाः | १५ |
| सन्ध्यालक्षणम् | १५ |
| यतिनक्तं विधवानक्तं च | १५ |
| विधुरनक्तं तल्लक्षणम् | १५ |
| सौरनक्तम् | १५ |
| हरिनक्तम् | १६ |
| नक्ते धर्माचरणम् | १६ |
| अयाचितनिर्णयः | १६ |
| नक्षत्रव्रतकालनिर्णयः | १६ |
| व्रतपरिभाषा | १६ |
| उपवासाधिकारिनिर्णयः | १६ |
| शूद्रवैश्यवर्णधर्माः | १६ |
| स्त्रीणामनुज्ञैव | १६ |
| स्त्रीणां स्नानविशेषः | १६ |
| व्रतसंकल्पस्तदारम्भकालश्च | १७ |
| भद्रानिर्णयः | १७ |
| भद्रापुच्छनिर्णयः | १७ |
| भद्रा सर्पिणी वृश्चिकी च | १७ |
| दिनभद्रा रात्रिभद्रा | १७ |
| व्रतारम्भे विशेषः | १७ |
| खण्डतिथिलक्षणम् | १७ |
| व्रतारम्भे धर्माः | १७ |

| विषयाः | पृष्ठांकाः |
|---|---|
| व्रतस्थधर्माः | १८ |
| व्रते ब्राह्मणभोजनम् | १८ |
| सहस्रभोजने विशेषः | १८ |
| द्वित्रियजमानकर्तृके | १८ |
| शूद्रस्य विप्रद्वारा व्याहृतिहोमः | १८ |
| प्रतिमास्वरूपनिर्णयः | १८ |
| अनादेशे आज्यद्रव्यम् | १८ |
| अनादेशमंत्रे समस्तव्याहृतिः | १८ |
| अनादेशे देवता प्रजापतिः | १८ |
| ग्रहादिपूजायां होमसंख्या | १८ |
| अनुक्तसंख्यायां निर्णयः | १८ |
| व्रतोद्यापनानुक्तौ निर्णयः | १८ |
| व्रतोद्यापनाशक्तौ निर्णयः | १८ |
| वृथा विप्रवचनग्रहणे निर्णयः | १९ |
| दक्षिणानिर्णयः | १९ |
| रजतदक्षिणानिषेधः | १९ |
| परान्नभोजननिषेधः | १९ |
| क्षारपदार्थनिषेधः | १९ |
| क्षारा हविष्यगणश्च | १९ |
| गोधूमप्रतिप्रसवः | १९ |
| व्रते ग्राह्यधान्यानि | १९ |
| कूष्माण्डादिनिषेधः | १९ |
| गृहीतव्रतत्यागे प्रत्यवायः | १९ |
| उपवासप्रत्याम्नायाः | १९ |
| व्रते नियमाः | २० |
| स्त्रीव्रते विशेषनिर्णयः | २० |
| विधवाया विशेषः | २० |
| एकादश्यां ताम्बूलनिषेधः | २० |
| अश्रुपातादिनिषेधः | २० |
| सूतकादौ व्रतनिर्णयः | २० |
| क्षतजाशौचे निर्णयः | २० |
| जाताशौचे निर्णयः | २१ |
| मृताशौचे निर्णयः | २१ |
| गर्भिण्यादीनां व्रतं प्रति निषेधः | २१ |
| पूर्वसंकल्पितव्रते रजस्वलासु प्रतिनिधयः | २१ |
| स्त्रीशूद्रयोर्व्रतादौ निषेधः | २१ |

'तिथिकृत्ये च कृष्णादिं, व्रते शुक्लादिमेव च। विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत्।।'

अथ **मलमासः**—तत्रैकमात्रसंक्रान्तिरहितः सितादिश्चान्द्रो मासो मलमासः। एकमात्रसंक्रान्तिराहित्यमसंक्रान्तत्वेन संक्रान्तिद्वयसत्त्वेन च भवतीति मलमासो द्वेधा—अधिमासः, क्षयमासश्चेति। तदुक्तं **काठकगृह्ये**—'यस्मिन्मासे न संक्रान्तिः, संक्रान्तिद्वयमेव वा। मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः।।' इति। **सत्यव्रतोऽपि**—'राशिद्वयं यत्र मासे संक्रमेत दिवाकरः। नाधिमासो भवेदेष मलमासस्तु केवलः।।' इति। अधिकमासस्य कालनियममाह **वसिष्ठः**—'द्वात्रिंशद्भिर्मितैर्मासैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण पतत्यधिकमासकः।।' इति। एतच्च सावनादिमानेन संभवार्थं, न तु नियमार्थम्; अन्यथा षोडशदिनाधिकद्वात्रिंशन्मासानन्तरं कृष्णपक्षनियमेन शुक्लादित्वभङ्गापत्तेः। तेन न्यूनाधिककाले मलमासपातेऽपि न दोषः। अत एवोक्तं **माधवीये**—'मासे त्रिंशत्तमे भवेत्' इति। क्षयस्यापि **ज्योतिःशास्त्रे**—'असंक्रान्तिमासोऽधिमासः स्फुटं स्यात्, द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्। क्षयः कार्तिकादित्रये, नान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं च।।' एकः क्षयात्पूर्वं, परतश्चैक इत्यधिमासद्वयं भवतीत्यर्थः।

अत्र **विशेषमाह जाबालिः**—'मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः।।' इति। उत्तरे एव कालाधिक्यं, न पूर्वस्मिन्नित्यर्थः। यत्तु **ब्रह्मसिद्धान्ते**—'चैत्रादर्वाङ् नाधिमासः, परतस्त्वधिको भवेत्।' इति,—तत्र चैत्रात्पूर्वमसंक्रान्तद्वये पूर्वो नाधिकः, किंतु पर इत्यर्थः। यच्च **ज्योतिःसिद्धान्ते**— 'घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनि। मकरे वाथ कुम्भे वा नाधिमासो विधीयते।।' इति,—तद्वृश्चिकादिचतुष्टये मलमासे सति पूर्वं तुलाकन्यागते सूर्ये क्षयपूर्वभाव्यधिमासस्य कालाधिक्यमात्रनिषेधार्थं[1], न त्वधिकमासस्य, 'दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्। नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चयः।।' इति **हेमाद्रौ विष्णुधर्मविरोधात्**। मलमासेऽष्टकादिनिषेधानुपपत्तेश्च[2]।।

[3]**क्षयस्यागमनकाल उक्तः सिद्धान्तशिरोमणौ**—'गतोऽब्ध्यद्रिनन्दैर्मिते[4] शाक-

---

१—'कालाधिक्यनिषेधार्थं न त्वधिकमात्रस्य' इत्यपि पाठः। २—'मकरे वाऽथ कुम्भे वेति दृष्टान्तार्थम्, प्रात्यभावात्' इत्यधिकं सर्वत्र। ३—सिद्धांतशिरोमणिकृतमिताक्षरायां 'कुवेदेन्दुवर्षैः' इत्यादिस्ववाक्यं कालावधिद्वयपरतयैव व्याख्यातं। तद्दृष्ट्वा माधवमदनरत्नादिभिः पूर्वस्मात् क्षयमासात् कुवेदेन्दु (१४१) परिमितैर्वर्षैर्द्वितीयः क्षयमासो भवति। क्वचित् गोकुभिः (१९) एकोनविंशतिपरिमितैर्वर्षैर्भवतीत्युक्तं, तथापि शिरोमण्युदाहृतचतुर्थक्षयमासस्य तृतीयात्क्षयमासाद्द्वाविंशत्यधिकशतवर्षैः (१२२) जातत्वेन नियमद्वयस्यापि व्यभिचारात्। अत एव मणिमरीचाख्यशिरोमणिटीकायां गोकुभिर्न्यूनः कुवेदेन्दुवर्षैश्चतुर्थः क्षयमास इति तृतीयावधिस्वीकारेण समाहितं। किंच वर्षत्रयाधिकषोडशशतवर्षपरिमितशककालेऽस्मदादिभिः स्मर्यमाणः शिरोमण्युदाहृतचतुर्थक्षयमासात् सपादशतद्वयवर्षैः (२२५) जातः। तत्र पूर्वोक्तनियमस्य कथमप्युक्तिसंभवाभावात्। तस्मात् ग्रहगतिविशेषात् यदा यस्मिन्दर्शान्तचान्द्रमासे संक्रान्तिद्वयं भवति तदा स क्षयमास इत्येव वक्तव्यमिति पुरुषार्थचिन्तामणिकारस्याभिप्रायः। ४—'गते' इति पाठः।